**पदस्तोभ** पु० पदस्थितः स्तोभः। पदमध्यपठिते निरर्थके शब्दभेदे गानशब्दे २५७२पृ०दृश्यम्। [लतायां राजनि०।

**पदाङ्गी** स्त्री पदं हंसपदमिवाङ्गं यस्याः ङीष्। हंसपदी-

**पदाजि** पु० पादेन अजति गच्छति अज-इण्। "पादस्य पदाज्यतीति" निर्देशात् वृद्ध्यभावः पादस्य पद इत्यादेशः। पादेन गन्तरि पदातौ अमरः।

**पदात** त्रि०पादेनातति अत-अच्। पदातौ शब्दरत्ना०।

**पदाति** पु० पादेन अतति गच्छति उपपदि अत-इण् पदादेशः। पादेन गन्तरि (पेयादा) अमरः। स्वार्थे क। पदातिक तत्रार्थे शब्दर०।

**पदाद्यविद्** पु० पदादिं न वेत्ति विद-क्किप् ६त०। पदाद्युच्चारणानभिज्ञे छात्रगण्डे अपकृष्टच्छात्रे हारा०।

**पदानुशासन** न० पदान्यनुशिष्यन्तेऽनेन अनु+शास-करणे ल्युट्। शब्दानुशासने व्याकरणे मेदि०।

**पदानुस्वार** पु० सामभेदे लाट्यायन० ६।८।१

**पदान्त** पु० ६त०। पदावसाने

**पदान्तर** न० अन्यत् पदम् मयू० स०। एकपदभिन्ने अन्यस्मिन्। १पदे २स्थानान्तरे च। [लिकेच मेदि०।

**पदार** पु० पदात् ऋच्छति ऋ-अच् ५त०। १पादधूलौ २पदा-

**पदार्थ** पु० ६त०। शब्दाभिधेये द्रव्यादौ। पदार्थाश्च दर्शनभेदेन नानाविधाः तत्तद्दर्शनमतप्रदर्शने उक्ता यथा वैशेषिकाणां द्रव्यादयः षट्, सप्त वा, नैयायिकमते प्रमाणादयः षोडश, सांख्यानां प्रकृत्यादयः पञ्चविंशतिः, पातञ्जलानां सेश्वराः प्रकृत्यादयः षड्विंशतिः। वेदान्तिनाम् चिदचिदात्मकौ द्वावित्येवं बोध्यम्।

**पदालिक** पु० पदस्य चरणस्यालिकमिव। चरणोपरिभागे

**पदासन** ६त०। पादपीठे हेमच०।

**पदि** पु०पद्यते पद-कर्मणि इन्। गन्तव्ये निरु० "पदिर्गन्तुर्भवति यत् पद्यते" निरु० ५।१८। "पदिस्तुर्तसिनाति" ऋ०१।१२५।२। [चारिणि स्त्रियां षित्त्वात् ङीष्।

**पदिक** त्रि० पादेन चरति पर्पा० ष्ठन् पदादेशश्च। पाद-

**पदिन्याय** पु० जैमि० १।१।१८ सूत्रोक्ते न्यायभेदे।

**पदिहोम** पु० पदि पादस्थाने होमः अलुक्स०। पदि जुहोति वर्त्मनि जुहोतीतिस्मृतिविहितहोमभेदे तत्र पादस्य हस्तिनएव ग्राह्यः "सर्वे पदो हस्तिपदे निमग्नाः" इत्युक्तेः। [पादेनोपहते।

**पदोपहत** त्रि० पादेन उपहतः पादस्य पद इत्यादेशः।

**पद्ग** त्रि० पद्भ्यां गच्छति गम-ड ३त०। पद्भ्यां गन्तरि पदातौ अमरः। पादशब्देन समासे तु अदन्तपदादेशे पदग इत्येव।

**पद्घोष** पु० ६त० वा पदादेशः। पादशब्दे। एवं शब्दमिश्रयोरपि वा पदादेशे पच्छब्दपन्मिश्रशब्दौ पादशब्दाद्यर्थे पक्षे पादघोष पादशब्द पादमिश्र तत्तदर्थे।

**पद्धति(ती)** स्त्री पादेन हन्यते गम्यते हन-गतौ आधारे क्तिन् पदादेशः वा ङीप्। १पथि २पङ्क्तौ च मेदि०। ३ग्रन्थस्य निष्कृष्टार्थबोधके ग्रन्थभेदे हेमच०। ४उपनामभेदे स च शूद्रस्य वसुघोषादिः। "शूद्राणां नामकरणे वसुघोषमित्रादिरूपपद्धतियुक्तनामत्वम्" उद्वा० रघु०।

**पद्धिम** न० पादस्य हिमं पदादेशः। पादशीतस्पर्शे।

**पद्म** न० पद-मन्। १कमले २गजमुखादिस्थे बिन्दुसमुदाये कमलाकारेण सैन्यादेरभिनिवेशनरूपे ३व्यूहभेदे ४निधिभेदे "अर्बुदमब्ज"मिति पद्मपर्य्यायाब्जनाम्नोक्तायां ५दशार्बुदसंख्यायां ६तत्संख्यातेषु ७पुष्करमूले ८सीसके धातौ ९शरीरस्थे नाडीचक्रभेदे च मेदि०। १०पद्मकाख्यौषधौ धरणिः। देहस्थपद्मानि च चक्रत्वेन प्रसिद्धानि तानि च चक्रशब्दे २८०८पृ० दर्शितानि। कमले पु०न० अमरे स्थितं तत्रास्य पुंस्त्वमप्रयुक्तदोषयुक्तमित्यालङ्कारिकाः। ११दाशरथौ १२नागभेदे पु० धरणिः। १३जिनचक्रवर्त्तिभेदे पु०हेम०। १४रतिबन्धभेदे पु० "हस्ताभ्याञ्च समालिङ्ग्य नारी पद्मासनोपरि। रमेद्गाढं समाकृष्य बन्धोऽयं पद्मसंज्ञकः" रतिम०।

**पद्मक** न० पद्ममिव कायति कै-क। १गजमुखादिस्थे पुष्पाकारे बिन्दुसमूहे अमरः। २पद्मकाष्ठे मेदि०। ३कुष्ठौषधौ राजनि० स्वार्थे क। ४पद्मशब्दार्थे च पद्मकाष्ठगुणाः भावप्र० उक्ता यथा "पद्मकं तुवरं तिक्तं शीतलं वातलं लघु। वीसर्पदाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत्। गर्भसंस्थापनं रुच्यं वमिव्रणतृषाप्रणुत्" [दयोऽप्यत्र।

**पद्मकर** पु० पद्मं करेऽस्य। पद्महस्ते विष्णौ पद्महस्ता-

**पद्मकन्द** पु० ६त०। कमलकन्दे शालूके "शालूकं शीतलं वृष्यं पित्तदाहास्रनुद् गुरु। दुर्जरं स्वादुपाकञ्च स्तन्यानिलकफप्रदम्। संग्राहि मधुरं रूक्षं भिस्साण्डमपि तद्गुणम्" भावप्र०।

**पद्मकाद्यघृत** न० "पद्मकामृतनिम्बानां धान्यचन्दनयोः पचेत्। कल्के क्वाथे च हविषः प्रस्थं छर्दिनिवारणम्। तृष्णारुचिप्रशमनं दाहज्वरहरं परम्" चक्रदत्तोक्ते पक्वघृतभेदे

**पद्मकाष्ठ** न०पद्ममिव सुगन्धि काष्ठमस्य। ओषधिभेदे राजनि०